Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2024 GISRRJ | Volume 7 | Issue 2 | ISSN : 2582-0095

# योगशास्त्रदृष्ट्या समाधेः स्वरूपनिर्धारणम्

डॉ. सुनील कुमार शर्मा
सहायकाचार्यः, शिक्षापीठम्, श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयःनवदेहली।

**Article Info**
**Article History**
Accepted : 25 March 2024
Published : 05 April 2024

**Publication Issue :**
Volume 7, Issue 2
March-April-2024

**Page Number :** 82-86

**शोधसारः** युजिर् योगे धातोः भावे इति सूत्रेण घञ् प्रत्यये योगशब्दः सिद्ध्यति। योगशास्त्रस्य मौलिकग्रन्थः योगसूत्रमस्ति । अस्य प्रवर्तकः पतञ्जलिः सूत्रमिदं चतुर्धा विभजितम्- समाधि-साधना-विभूति-कैवल्यभेदेन । तत्र प्रामुख्येण योगाङ्गानां विवेचनं वर्तते । योगाङ्गेषु समाधेः महत्त्वपूर्णं स्थानं वर्तते । समाधिर्नाम "तदेवार्थमात्रनिर्मासं स्वरूपशून्यमिव समाधिः" इति। तदेव उक्तलक्षणम् ध्यानं यथार्थमात्रनिर्भासम् अर्थाकारसमावेशात् उद्भूतार्थरूपम् अश्रुतम् ज्ञानस्वरूपत्वेन स्वरूपशून्यतामिव आपद्यते सः समाधिरित्युच्यते। एवं च संयगाधीयते एकाग्रीक्रियते यत्र मनः स समाधिः इति। एवं च उक्तलक्षणस्य समाधिरूपोयोगाङ्गस्य साङ्गोपाङ्गविवेचनं शोधपत्रेऽस्मिन् वर्तते।

**कूटशब्दाः-** समाधिः, सम्प्रज्ञातः, असम्प्रज्ञातः, योगः, चित्तभूमयः, वितर्कः, विचारः, आनन्दः।

**प्रस्तावना-** युज समाधौ, युजिर् योगे, युज् संयमने च इति धातूनां भावे घञ्-प्रत्यये कृते निष्पन्नोऽयं योग शब्दः । योगः "सन्नहनोपायध्यानसङ्गतियुक्तिषु"[1] इति अमरकोशस्य वाक्येन योगशब्दः कवच, उपाय, ध्यान, सम्बन्ध, योग्यता इत्यर्थेषु वर्तते । वेदेषु, उपनिषत्सु, शास्त्रेष्वपि योगशब्दः नानार्थेषु प्रयुक्तः दृश्यते। योगशब्दस्यार्थो भवति युक्तः, समाहितः, एकाग्रश्च । आत्मनः परमात्मनि मिलनमेव योगः । ऋग्वेदे अयमेव योगशब्दोऽस्मिन्नेवार्थे प्रयुक्तो दृश्यते । यथा-

**यस्मादृते न सिद्धयति यज्ञो विपश्चितश्चन । स धीनां योगमिन्वति ॥**[2]

अर्थात् यान् इन्द्रादिदेवान् विना प्रकाशपूर्णज्ञानोनः जीवनयज्ञोऽ सम्पूर्णो भवति तैस्साद्धं बुद्धिकर्मणां योगः करणीयः । गीतायां भगवता श्रीकृष्णेन योगस्य द्वैविध्यमुक्तं कर्मयोगः, ज्ञानयोगश्चेति । यथा -

**लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ।**
**ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥**[3]

---

[1]. अमरकोशः, नानार्थवर्गः. 3/3/22/2/1

[2]. ऋग्वेद.1/18/7

[3]. गीता.3/3

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License.

एवं कर्मयोग–ज्ञानयोगद्वयं प्रतिपाद्य तत्र निर्विशेषब्रह्मज्ञानोपायत्वेन अष्टाङ्गयोगानां प्रतिपादनमपि कृतम् । यथा– यम–नियम–आसन–प्राणायाम–प्रत्याहार–धारणा ध्यान–समाधय:। योगतत्त्वोपनिषद्युक्तं यत् योगं विना ज्ञानं मोक्षदं न भवति न च ज्ञानहीन: योगोऽपि मोक्षकर्मणि समर्थो भवति । तद्यथा –

**योगहीनं कथं ज्ञानं मोक्षदं भवति ध्रुवम् ।**

**योगोऽपि ज्ञानहीनस्तु न क्षमो मोक्षकर्मणि ।**

**तस्माज्ज्ञानं च योगं च मुमुक्षुर्दृढमभ्यसेत् ॥**[4]

एतद्भिन्नं वराहोपनिषदि, शाण्डिल्योपनिषदि, हंसोपनिषदि चापियोगविषयेचर्चा विहिता । एवमेव चरकसंहितायामुक्तं यत् मनसा इन्द्रियैश्च विषयसम्पर्क प्राप्त्वा आत्मा सुखी दु:खी च भवति । यदा मन: आत्मनि स्थिरं भवति तदा सुखदु:खानामनुभूति: न भवति । एवं मनस: आत्मनि परमात्मनि वा लीनत्वं योग इत्युच्यते।तद्धि–

**आत्मेन्द्रियमनोऽर्थानां संनिकर्षात् प्रवर्त्तते ।**

**सुखं दु:खमनारम्भादात्मस्थे मनसि स्थिरे ॥**

**निवर्तते तदुभयं वशित्वं चोपजायते ।**

**सशरीरस्य योगज्ञास्तं योगमृषयो विदु: ॥**[5]

याज्ञवल्क्यस्मृतौ उक्तं यत्– योगस्य आश्रयेण परमात्मतत्त्वदर्शनं सम्भवति । तद्यथा–

**इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् ।**

**अयं तु परमो धर्मो यद्योगेनात्मदर्शनम् ।।**[6]

महाभारते यौगिकविघ्नानां वर्णनपूर्वकं तान् योगात् अनादृत्य तत्त्ववित् आत्मन्येव निवर्तयितुमुक्तमस्ति । तद्यथा –

**प्रमोहो भ्रम आवर्ती घ्राणं श्रवणदर्शने ।**

**अद्भुतानि रसस्पर्शे शीतोष्णे मारुताकृति: ॥**

**प्रतिभामुपसर्गांश्चाप्युपसंगृह्य योगत: ।**

**तांस्तत्त्वविदनादृत्य आत्मन्येव निवर्तयेत् ॥**[7]

एतादृशो महनीयो योगशास्त्रस्य प्रवर्तक: हिरण्यगर्भो पतञ्जलिस्तु तस्यानुशासनमेव कृतवान्निति याज्ञवल्क्यमहर्षे: मतम् । योगदर्शनस्य मौलिकग्रन्थ: "योगसूत्रम्" अस्ति । अस्य प्रवर्तक: व्याकरणमहाभाष्यस्य रचयिता, चरकसंहिताकर्ता पतञ्जलिरेव भवति । तदुक्तं–

**योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन ।**

**योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि ॥**

---

[4]. योगतत्त्वोपनिषद्.14–15

[5]. चरकसंहिता, शरीरस्थान.1/44

[6]. याज्ञवल्क्यस्मृति.1/1/8

[7]. महाभारत, शान्तिपर्व.240/23–24

व्याकरणस्य महाभाष्ये यथा आदौ **"अथ शब्दानुशासनम्"**[8] इति पदं प्रयुक्तमनेन तथैव योगसूत्रस्याप्यादौ **"अथ योगानुशासनम्"**[9] इति उक्तम् । अयं शेषावतारइत्युच्यते ।

**प्रतिपाद्यविषया:** योगसूत्रे चत्वार: पादा: विद्यन्ते। यथा- समाधिपाद:, साधनपाद:, विभूतिपाद:, कैवल्यपादश्च। अत्र समुदायसूत्रसङ्ख्या पञ्चनवत्यधिकैकशत। योगशास्त्रस्य मौलिकसिद्धान्तो भवति **"चित्तशुद्धि:"**। योगो नाम समाधि: । अयं चित्तवृत्तिनिरोध इत्यप्युच्यते, **"योगश्चित्तवृत्तिनिरोध:"**[10] इति वचनात् । चित्तस्य पञ्चावस्था: क्षिप्त-मूढ-विक्षिप्त-एकाग्र-निरुद्धा: भवन्ति। सत्त्वरजस्तमोगुणानां न्यूनाधिक्येन एता अवस्था: जायन्ते। चित्तस्य निरुद्धावस्थैव योग उच्यते। चित्तस्य त्रीणि रूपाणि भवन्ति। प्रख्या, प्रवृत्ति:, स्थितिरिति। पञ्च चित्तवृत्तयस्सन्ति। यथा 1) प्रमाणम्, 2) विपर्यय:, 3) विकल्प:, 4) निद्रा, 5) स्मृति:। प्रत्यक्षानुमानशब्दभेदेन प्रमाणानि त्रीणि सन्ति। कस्यापि वस्तुन: मिथ्याज्ञानं विपर्यय इत्युच्यते। चैतन्यपुरुषयो: पृथज्ज्ञानं विकल्प: । मिथ्याज्ञानेन क्लेश उत्पद्यते। अयं क्लेश: योगदर्शन अविद्या-अस्मिता-राग-द्वेष-अभिनिवेशभेदेन पञ्चधा भवति। क्लेषान्मुक्त्यर्थमत्र अष्टाङ्गयोगमार्गा: प्रतिपादिता:। यथा-यम-निमय-आसन-प्राणायाम-प्रत्याहार-धारणा- ध्यान-समाधय:।

**समाधि:** "समाधीयन्ते वित्तमनेन" इति समाधि: । योग:, समाधि: इति पर्यायवाचिनौ शब्दौ । व्यासभाष्ये उच्यते "योग: समाधि:" इति । साधकस्य निरन्तराभ्यासकारणात् ध्यानं यदा ध्येयमात्रप्रकाशकं भवति, तदा सा अवस्था समाधिरित्युच्यते । उक्तं च-

**तदेवार्थमात्रनिर्भासं स्वरूपशुन्यमिव समाधि:।**[11]

आदौ ध्येयवस्तुन: धारणा भवति, तदनन्तरं ध्यानं क्रियते, तत: समाधिर्जायते । ध्यानकाले चित्तं, चित्तवृत्ति:, चित्तवृत्ते: विषयश्चेति त्रयाणां ज्ञानं भवति । परन्तु यदा एते त्रयोऽपि विषया: सूक्ष्मरूपेण तिष्ठन्ति तदा समाधि: इत्युच्यते। यथा जले मिश्रितस्य लवणस्य प्रतीति: जलवदेव भवति, तथैव समाधिकाले ध्येय: ध्यानरूपेणैव प्रतिभासते । धारणा-ध्यान-समाध्यावस्थासु कालभेद: अधोलिखितरूपेण वर्ण्यते-

धारणापञ्चनाडीक्ता ध्यानं स्यात्षष्टिनाडिकम् ।
दिनद्वादशकेनैव समाधिरभिधीयते ॥[12]

समाधि: चित्तस्य धर्म: । चित्तभूमय: पञ्च उक्ता:। यथा (1) क्षिप्ता (2) गूढा (3) विक्षिप्ता (4) एकाग्रा (5) निरुद्धा चेति । तमोगुणाधिक्यात् चित्तं "गूढमि" त्युच्यते। समबलौ रजस्तमोगुणौ सत्त्वापेक्षया न्यूनौ चेत् चित्तं "क्षिप्तम्" इति कथ्यते । तमोगुणे क्षीणे, रजोगुणापेक्षया च सत्त्वाधिक्ये चित्तं "विक्षिप्तम्" भवति । चित्ते रजस्तमोगुणयो: विनाशो यदा जायते, तदा सत्त्वाधिक्ये चित्तं "एकाग्रम्" उच्यते । अस्यामवस्थायां पुरुष: बाह्यविषयेषु विरक्तो भूत्वा आत्मस्वरूपे मन: स्थिररूपेण संस्थाप्य तिष्ठति । तत: कञ्चित्कालादनन्तरं सकलवृत्तिनिरोध: जायते। तदा चित्तं "निरुद्धम्" इति कथ्यते। एवं चित्तस्य अन्तिमावस्थाद्वयमेव "समाधि" पदेनाभिधीयते । तत्र एकाग्रावस्था सम्प्रज्ञातसमाधि:, निरुद्धावस्था असम्प्रज्ञातसमाधिरिति वक्तुं शक्यते । एवं समाधे: द्वैविध्यं कल्प्यते ।

---

8. महाभाष्य.1

9. योगसूत्र.1/1

10. योगसूत्र.1/2

11. योगसूत्र.3/33

12. स्कन्धपुराण

**सम्प्रज्ञातसमाधि**: "वितर्कविचारानन्दास्मितारूपानुगमात् संप्रज्ञातः"।[13] अर्थात् सात्त्विकवृत्त्या संशयादिरहितत्वेन प्रकर्षेण पूर्णतया अधिगतः ध्येयाभिदोपचारेण समाधिः सम्प्रज्ञातसमाधिरित्युच्यते । सम्पज्ञातसमाधिः चतुर्णां ध्येयवस्तुनामनुगमनं करोति । यथा वितर्कः, विचारः, आनन्दः, अस्मिता च। तस्मात् एषः समाधिः चतुर्विधः। यथा-(1) वितर्कानुगतसम्प्रज्ञातसमाधिः (2) विचारानुगतसम्प्रज्ञातसमाधिः (3) आनन्दानुगतसम्पज्ञातसमाधिः (4) अस्मितानुगतसम्प्रज्ञातसमाधिश्च । अत्रानुगमो नाम साक्षादुपस्थितिः । "वितर्को" नाम चित्तस्यालम्बने स्थूल आभोगः। सूर्यः, चन्द्रः, ग्रहः, रामः, कृष्णः, इत्यादीनां मूर्तीनां स्थूलवस्तूनां वा प्राकृतिकपञ्चमहाभूतानां पूजार्चनाः कृत्वा तेष्वेव चित्तनियोजनं वितर्कानुगतसम्पज्ञातसमाधिरित्युच्यते । स्थूलवस्तुषु लीनता इत्यर्थः। "विचारः" सूक्ष्मो भवति । भावनात्मकसूक्ष्मविषयाः रूप-रस-गन्धादयः अत्राभ्यस्ताः भवन्ति। एतेषु वस्तुषु मनसः एकाग्रता विचारानुगतसम्प्रज्ञातसमाधिरिति कथ्यते । "आनन्दः" ह्लाद उच्यते। तृतीयस्तरे विचारोऽपिशून्यो जायते । अत्र केवलमानन्द एवावशिष्यते । अत अयमानन्दानुगतसमाधिरिति कथ्यते । एकात्मिका संवित् "अस्मिता" कथ्यते । अस्यापरं नामाहङ्कारः । चतुर्थस्तरे आनन्दस्यापि विनाशो भवति। ततः अहङ्कार उत्पद्यते । अयमेव अस्मितानुगतसमाधिः प्रोच्यते । एवं वितर्कादीनां क्रमशः अभ्यासात् एकैकशो लोपो जायते । यथोक्तम् योगसूत्रे- प्रथमचतुष्टयानुगतसमाधिः सवितर्कः । द्वितीयो वितर्कविकलः सविचारसमाधिः। तृतीयो विचारविकलः सानन्दसमाधिः। चतुर्थस्तद्विकलोऽस्मितामात्रसमाधिरिति । सर्वे एते सालम्बनाः समाधयः।

**असम्प्रज्ञातसमाधि**: "विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः"[14] । यदा सर्वा अपि वृत्तयः अस्तंगमिताः भवन्ति, तदा चित्ते कञ्चन संस्कारविशेषः जायते। स एव संस्कारशेषः "असम्प्रज्ञातसमाधिः" इति कथ्यते। सालम्बनाभ्यासः अस्य समाधेः सिद्ध्यर्थमसमर्थः। अतो सकलविषयहीनं परवैराग्यं पदार्थहीनत्वम्, सकलविषयशून्यत्वमेव तस्य साधने उपायः। अयमेव "निर्बीजसमाधिः" इति कथ्यते। असम्प्रज्ञातसमाधि: द्विविधः (1) उपायप्रत्ययः (2) भवप्रत्ययश्च। तत्र "उपायप्रत्ययः" योगिनां भवति। "भवप्रत्ययः" विदेहानाम्, प्रकृतिलीनानां च जायते । "देवलोके भवप्रत्ययो जन्ममात्रकारणकः" इति योगवार्तिकमतानुसारम् अयं योग इति न कथ्यते। अपि तु तस्य योगाभासत्वमेव । योगिनामुपायप्रत्यये क्रम उक्तः। यथा तेष्वादौ श्रद्धा जायते। श्रद्धा चेतसः सम्प्रसादः। सा हि जननीव कल्याणी योगिनं पाति। तस्य हि श्रद्धानस्य विवेकार्थिनो वीर्यमुपजायते। समुपजातवीर्यस्य स्मृतिरुपजायते। स्मृत्युपस्थाने च चित्तमनाकुलं समाधीयते। समाहितचित्तस्य प्रज्ञाविवेक उपावर्तते। येन यथावद् वस्तु जानाति। तदभ्यासात्तद्विषयाच्च वैराग्यात् असम्प्रज्ञातः समाधिर्भवति। तत्रापि योगिनां नव भेदाः प्रोक्ताः। यथा- मृदूपायः, मध्योपायः, अधिमात्रोपायश्च। एतेषामपि त्रयाणां प्रत्येकं त्रिविधत्व मृदु-मध्य-तीव्रभेदात् । अन्ते शीघ्र समाधिप्राप्तेः उपायः प्रोक्तः " ईश्वरप्रणिधानाद्वा"[15] इति।

**सन्दर्भाः**


1. योगसूत्रम्, महर्षि पतञ्जलिः, चौखम्बा संस्कृत भवन, वाराणसी, संवत्-2001
2. पातञ्जलयोगदर्शनम्, पूर्णचन्द्र शर्मा, कलकता, संस्करण 1818
3. पातञ्जलयोगदर्शनं व्यासभाष्यसहितम्, दर्शन योग महाविद्यालय, गुजरात, दिसम्बर 2014


---

[13]. योगसूत्र.1/17

[14]. योगसूत्र.1/18

[15]. योगसूत्र.1/23

4. योगवेदान्तकौस्तुभः, आचार्य दिगम्बर महापात्र, उमेशचन्द्र महापात्र, श्री गुरु गौराङ्ग प्रेस, भुवनेश्वर, 2007
5. योगप्रदीपिका, भावा गणेशः, चौखम्बा संस्कृत भवन, वाराणसी, संवत्-2001
6. राजमार्तण्ड, भोजराज, चौखम्बा संस्कृत भवन, वाराणसी, संवत्-2001
7. उपनिषद् ग्रन्थावली (प्रथम भाग), स्वामी गम्भीरानन्द, उद्बोधन कार्यालय, कलकता, तृतीय संस्करण, 2017
8. श्रीभाष्यम्, श्रीभगवद्रामानुज, उभयवेदान्त ग्रन्थमाला, चेन्नै, संवत्-1997
9. गीताभाष्यम्, श्रीभगवद्रामानुज, उभयवेदान्त ग्रन्थमाला, चेन्नै, संवत्- 2000